अस्मिन् प्रश्नपत्रपुस्तिकायाम् 28 प्रश्नाः [खण्ड-क (20) + खण्ड-ख (4+4)] एवम् 7 मुद्रित पृष्ठाः सन्ति।

Roll No.
अनुक्रमाङ्कः :

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | | | | | | | | | |

Code No. / कूट सं. **64/SS/O/S**

SET **A**

# SANSKRIT
# संस्कृतम्
# (309)

Day and Date of Examination :
( परीक्षादिवसः दिनाङ्कश्च ) ______________________

Signature of Invigilators :
( निरीक्षकयोः हस्ताक्षरम् ) 1. ______________________

2. ______________________

---

**सामान्य अनुदेशाः :**

1. परीक्षार्थी प्रश्नपत्रपुस्तिकायाः प्रथमपृष्ठे स्व-अनुक्रमाङ्कम् अवश्यं लिखतु।

2. निरीक्ष्यतां यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य शीर्षे मुद्रितसंख्यानुसारमेव अस्ति। प्रश्नाः क्रमानुसारं सन्ति न वा इत्यपि निरीक्षणीयम्।

3. उत्तरपुस्तिकायां परिचयचिह्नम् अथवा कुत्रापि निर्दिष्टस्थानेतरस्थलेषु अनुक्रमाङ्कलेखनं सर्वथा वर्जितम् अस्ति।

4. स्व-उत्तरपुस्तिकायां प्रश्नपत्रस्य कूट (कोड) संख्या **64/SS/O/S-A** अवश्यमेव लेखनीया।



Unnati Educations
9899436384, 9654279279

# SANSKRIT

# संस्कृतम्

# (309)

**समय : होरात्रयम् ]** **[ पूर्णाङ्काः - 100**

**निर्देशाः** (i) अस्मिन् प्रश्नपत्रे **द्वौ** खण्डौ स्तः। खण्डः - क (केन्द्रिकः पाठ्यक्रमः), खण्डः - ख (वैकल्पिक I एवं वैकल्पिक II) स्तः।

(ii) खण्डः - क **अनिवार्यः।** अस्मिन् खण्डे 20 प्रश्नाः सन्ति।

(iii) खण्डः - ख **एकः** एव वैकल्पिकः समाधेयः।

(iv) खण्डः - क कृते 85 अङ्काः, खण्डः - ख संस्कृतं संस्कृतिश्च अथवा प्रयोजनमूलकसंस्कृतम् इति वैकल्पिकयोः केवलम् एकः एव वैकल्पिकः समाधेयः। अस्य कृते 15 अङ्काः निर्धारिताः।

## खण्ड - क

## केन्द्रिकः पाठ्यक्रमः

**1.** अधोलिखितेषु कस्यचिदेकस्य पाठस्य सारं षड्वाक्येषु लिखत - **6**

(क) काले फलति सौभाग्यम्

(ख) अति लोभः न कर्तव्यः

(ग) क्रोधोऽनर्थकारकः

**2.** अधोलिखितं गद्यांशं पठित्वा प्रश्नान् संस्कृतेन उत्तरत - **1x4=4**

अत्रविशिष्टं ध्यानमंदिरं अस्ति। स्मारकस्य अन्धकारमये प्रकोष्ठे पुरतः 'ॐ' इत्यस्य चित्रं दृश्यते। अत्र सर्वे मौनं तिष्ठन्ति। शिलास्मारकस्य विशाले परिसरे देश-विदेशेभ्यः पर्यटकाः आगत्य अस्य सुंदरतां पश्यन्ति साधनां च कुर्वन्ति।

**प्रश्नाः**

(क) विशिष्टं ध्यानमंदिरं कुत्र अस्ति?

(ख) अंधकारमये प्रकोष्ठे कस्य चित्रं पुरतः दृश्यते?

(ग) प्रकोष्ठे सर्वे कथं तिष्ठन्ति?

(घ) पर्यटकाः तत्र आगत्य किं कुर्वन्ति?

**3.** अधोलिखितानां प्रश्नानाम् उचितमुत्तरं चित्वा लिखत - **1x4=4**

(क) कन्याकुमारी भारतस्य कस्मिन् भागे स्थिता? (दक्षिणे/पश्चिमे)

(ख) कानि कर्माणि शिष्येन सेवितव्यानि? (प्रदत्तानि/सुचरितानि)

(ग) जीवकः कस्य मस्तिष्कस्य शल्यक्रियाम् अकरोत्? (सुश्रुतस्य/भोजराजस्य)

(घ) कः दरिद्रः अपिसच्चरित्रवान् आसीत्? (शर्विलकः/चारुदत्तः)



Unnati Educations
9899436384, 9654279279

4. (क) रेखाङ्कित पदमाश्रित्य प्रश्ननिर्माणं कुरुत – 1x2=2

(i) आचार्यस्य उपदेशा: उपासितव्या:।

(ii) नूनम् अग्रे स्वर्णं भविष्यति।

(ख) प्रश्नान् उत्तरत – 1x2=2

(i) छिन्ननासिकाया: प्रत्यारोपणार्थं शल्यचिकित्सा कुत्र वर्णिता?

(ii) पाइथागोरस – सिद्धान्त: कुत्र वर्णित:?

5. एतत् कथनं क: कंप्रति कथयति? 2

(क) ब्रह्मन् न खलु साधुसेवितोऽयं पन्था: येनासि प्रवृत्त:।

(ख) वत्से सरस्वति, विषादं मा गा:। एषा त्वामनुयास्यति सावित्री।

6. अधोलिखितं पद्यांशद्वयं पठित्वा प्रश्नान् उत्तरत – 2+2=4

(क) आमेखलं संचरतां घनानां छायामध: सानुगतां निषेव्य।
उद्वेजिता: वृष्टिभिराश्रयन्ते शृंगाणि मस्यात पवन्ति सिद्धा:॥

**प्रश्नद्वयम् :**

(i) हिमालये वृष्टिभि: उद्वेजिता: के भवन्ति?

(ii) सिद्धा: घनानां छायां कुत्र सेवन्ते?

(ख) को वर्धते विनीत: को वा क्षीयते यो दृप्त:।
कोन प्रत्येत, को ब्रूते, यश्चानृतं शाश्वत्॥

**प्रश्नद्वयम् :**

(i) कस्य सदा क्षय: भवति?

(ii) क: न प्रत्येतव्य:?

7. अधोलिखितयो: अन्वयद्वयो: रिक्तस्थानपूर्तिं कुरुत – 2

(क) यस्य वाङ्मनसी शुद्धे सम्यक् गुप्ते च सर्वदा।
स वै सर्वमवाप्नोति वेदान्तोपगतं फलम्॥

यस्य वाङ्मनसी __________ सम्यक् गुप्ते च सर्वदा। स वै सर्वम् __________ फलम् भवाप्नोति।

(ख) वहन्ति वर्षन्ति नदन्ति भान्ति, ध्यायन्ति नृत्यन्ति समाश्वसन्ति।
नद्यो घना मत्तगजा: वनान्ता: प्रिया विहीना: शिखिन: प्लवङ्गा:॥

नद्य: वहन्ति, घना: वर्षन्ति, मत्तगजा: __________ वनान्ता: भान्ति, प्रिया विहीना: ध्यायन्ति, __________ नृत्यन्ति, प्लवंगा: समाश्वसन्ति।

8. अधोलिखित पद्यांशद्वयस्य भावार्थे रिक्तस्थानानि पूरयत – 2

(क) कदर्यं दानेन जयेत।

**भावार्थ:** – कृपणताभावं __________ दत्त्वा दूरीकुर्यात्।

(ख) अनुव्रत: पितु: पुत्र:।

**भावार्थ:** – पुत्र: __________ आज्ञाकारी स्यात्।



Unnati Educations
9899436384, 9654279279

9. 'अ' स्तम्भस्य पद्यांशं 'ब' स्तम्भेन सह मेलयत – 2

| | अ | | ब |
|---|---|---|---|
| (i) | दानं प्रियवाक्यसहितं | (क) | विदुषा प्राज्ञमानिना |
| (ii) | कुतस्तद्धनलुब्धानाम् | (ख) | कोहन्ति करिण्णां कुलम् |
| (iii) | कस्तूरी जायते कस्मात् | (ग) | इतश्चेतरपधावताम् |
| (iv) | सचिवेनापनीतंते | (घ) | ज्ञानमगर्वं क्षमान्वितं शौर्यम् |

10. 'हृदयपरिवर्तनम्' इति नाटकस्य सारांशं षड्वाक्येषु लिखत – 6

सहायतायै बिन्दवः दत्ताः–

| बिन्दवः |
|---|
| यक्षाः, पंच, ब्राह्मणवश धारिणः, मैत्रबलरासः, राज्ये विचरन्ति, ते गोपाल केन, वने, वादितं, वंशीध्वनिं शृण्वन्ति, वंशीवादकः, गवां समीपे, आसीत् सर्वे, अग्रेगच्छन्, गोपालकः बोधिसत्वस्यराज्ये निर्माक भावं, कथयति, रामा, तेषां, इच्छानुरुपं, मांसरुधिभोजनं यच्छति सर्वे हिंसात्यजन्ति। |

11. अधोलिखितं नाट्यांशद्वयं पठित्वा प्रश्नान् उत्तरत –

(क) गोपालकः – (ब्राह्मणवेशान् यक्षान् विलोक्य) 1+1=2

स्वागतम्, अत्र भवताम्। कुतः समायाताः भवन्तः?

यक्षाः – अरण्यदर्शनोत्सुकाः वयम् इहागताः स्यः।

परंत्वम् एकाकी विचरन् वंशी च वादयत् भीति न अनुभवसित?

गोपालकः – कुतो–भीतिः। भगवति बोधिसत्त्वे मैत्रीबले राज्यं शासित सर्वाः प्रजाः निर्भया सन्ति। कश्चित् कमपि पीडयितुं न प्रभवति।

यक्षाः – किं राक्षसाः अपि?

गोपालकः – अथ किम्। यदि कौतूहलं, श्रूयताम्।

**प्रश्नाः**

(i) यक्षाः वने किमर्थं आगताः?

(ii) कस्य शासने सर्वे प्रजाः निर्भया सन्ति?

(ख) विभवानुगता भार्या सुख दुःख सहृद् भवान्। 1+1=2

सत्यं च न परिभ्रष्टं यद् दरिद्रेषु दुर्लभम्।

**प्रश्नाः**

(i) चारुदत्तस्य भार्या कीदृशी?

(ii) दरिद्रेषु किं दुर्लभं भवति?



Unnati Educations
9899436384, 9654279279

**12.** अधोलिखितं गद्यांशं पद्यांशं च पठित्वा उभयोः प्रदत्त-प्रश्नान् उत्तरत –

**( क ) गद्यांश**

मानवः एकः सामाजिकः प्राणी। समाजे कुटिलानां न्यूनता कदापि नासीत् ये परान् वञ्चयित्वा स्वार्थं साधयन्ति। खलानामाचरणं मशकाणां सदृशं भवति। अतः तेषु कुटिलेषु कीदृशम् आचरणं कर्त्तव्यम् इति विचारणीयम्। नीति शास्त्रे स्पष्ट मेवोक्तम् यत् दुष्टेषु सरलतया व्यवहारे कृते सज्जनानां पराभवो भवति। अतः यस्मिन् यथा यो वर्तते मनुष्यः तस्मिन् तथा वर्तितव्यमिति। अतः आर्जवं कुटिलेषु न नीतिः। धूर्तैः सह तथा विधा कृता धूर्तता कुटिलता वा न दोषाय प्रत्युत गुणाय एवं भवति।

**प्रश्नाः**

(i) अस्य गद्यांशस्य शीर्षकं लिखत। 1

(ii) दुष्टानामाचरणं कथं भवति? 2

(iii) कुटिलैः सह सज्जनैः कथं व्यवहर्त्तव्यम्? 2

**( ख ) पद्यांशः**

वनेऽपि सिंहा मृग मांस भक्षाः बुभुक्षिता नैव तृणं चरन्ति।

एव कुलीना व्यसनामिभूताः न नीतिमार्गं परिलङ्घयन्ति।

**प्रश्नाः**

(i) अस्य श्लोकस्य शीर्षकं लिखत। 1

(ii) सिहाः किम्भक्षाः? 2

(iii) नीतिमार्गं के न परिलङ्घयन्ति? 2

**13.** मंजूषापदसहायतया 'सूर्योदय' इति विषयमधिकृत्य दशवाक्यानि लिखत – **1x10=10**

| **मंजूषा** |
|---|
| रात्रौ गतायां, सूर्योदयः भवति, जनाः शयनात् उत्थाय, स्वकार्येषु व्याप्ताः भवन्ति, पक्षिणः अपि भ्रमन्ति, कर्मकाराः स्ववृत्तिषु लग्नाः, विद्यार्थिनः विद्याध्ययनाम प्रवृत्ताः सर्वे जनाः जीवन वृत्यै उत्साहिता, उपवनेषु पुष्पाणि पक्षिणः कूजन्ति, लोके नवजीवन समायाति। |

**14.** भवान् रूपेशः। भवतां निवासक्षेत्रे जलापूर्तिः यदा-कदा बाधिता भवति। तदर्थं जलपरिषदं प्रति पत्रं लिखतु। **6**

**15.** भवान् संविदः। भवतः मित्र गणेशः 'प्रतिदिनं प्रातः अध्ययनस्य लाभान् अधिकृत्य भवतोः मध्येजातं संवादं चतुर्ष वाक्येषु लिखतु। **1x4=4**

**16.** रेखाङ्कितपदे संधिच्छेदं कुरुत – **1**

(क) किं चानर्धं, यदवसरे दत्तम्।

(ख) वित्तं त्यागसमेतं दुर्लभतच्च्युतुविधिम्।



Unnati Educations
9899436384, 9654279279

17. (क) रेखाङ्कित पदे का विभक्तिः किं च मूलपदम्? 2

कस्य वशे जगदेतत्?

(ख) वाणासुरः कस्यपुत्रः आसीत्? सः जनान् अरक्षत्। रेखाङ्कित पदद्वयं लट् लकारे परिवर्त्य लिखत। 2

(ग) यथानिर्दिष्टं वाच्य – परिवर्तनं कुरुत – 1

राजाभणति। (कर्मवाच्ये)

**अथवा**

पुत्तलिकया कथां कथ्यते (कर्तृवाच्ये)

18. समुचितपदनिर्माणं कृत्वा रिक्तस्थानं पूरयत – 1x5=5

(क) कृष्णः __________ दुष्टं कंसं हतवान् (बाल्यकाल + उचित विभक्ति)

(ख) देवक्याः विवाहः __________ सह अभवत्। (वसुदेव + उचित विभक्ति)

(ग) सेवकः __________ वदति। (उप + विश् + ल्यप्)

(घ) कंसः षड्यंत्रैः कृष्णं बलरामं च __________ प्रयासं करोति (हन् + तुमुन)

(ङ) __________ अशान्तिः बहुरोगान् जनयति। (मनस् + उचित विभक्ति)

19. रेखाङ्कित पदस्य विग्रहं कृत्वा लिखत – 2

(क) मातृदेवः।

(ख) महादुःखम्।

20. अधोलिखित वाक्ये एकम् अव्ययम् एकम् उपसर्गं चित्वा लिखत – 2

(क) दामोदरः बलरामेण सह गच्छतु।

(ख) गीतायाः कर्मणः महत्त्वं प्रतिपादितम्।

## खण्ड – ख

## वैकल्पिक – I

## ( संस्कृतं – संस्कृतिश्च )

21. अधोलिखितकाव्यानां तेषां लेखकैः सह मेलनं कृत्वा लिखत – 2

| | **'अ'** | | **'ब'** |
|---|---|---|---|
| (i) | अनुभूतिशतकम् | (क) | श्रीधरभास्करवर्णेकरः |
| (ii) | शिवराज्याभिषेकम् | (ख) | डा. रामजी उपाध्यायः |
| (iii) | द्वा सुपर्णा | (ग) | डा. रमाकान्त शुक्लः |
| (iv) | भाति मे भारतम् | (घ) | डा. जीतराम भट्टः |



Unnati Educations
9899436384, 9654279279

22. अधोलिखित प्रश्नान् उत्तरत –

(क) अधोलिखित संख्यानां कृते संस्कृत पदानि लिखत – 2

$10^2$, $10^{22}$

(ख) आर्यभट्टस्य कस्मिन् शास्त्रे योगदानं वर्तते? तेन किम् साधितम्? 2

(ग) संस्कृतम् कस्य भाषापरिवारस्य भाषा अस्ति? वैदिकरूपं कस्मिन् ग्रंथे प्राप्यते? 2

(घ) चित्रात्मक लिपि: कस्या: भाषाया: अस्ति। 1

23. प्राकृतभाषाया: उद्भव: कदा अभवत्? अस्या: प्रयोग: कस्यनारकेषु प्राप्यते? 2

24. (क) भारतीय संस्कृते: व्यवस्थितरूपं कस्मिन् युगे प्राप्यते? 1

(ख) आश्रमव्यवस्था का अस्ति? कानि आश्रमाणां नामानि? 2

(ग) कस्य जातकर्मसंस्कार: क्रियते? 1

## वैकल्पिक – II
## (प्रयोजनमूलक संस्कृतम्)

21. अधोलिखित वाक्येषु रिक्तस्थानानि पूरयत – 1x4=4

(क) वेदानां बोध: __________ संस्कृतेन एवं भवितुं शक्यते।

(ख) सुश्रुतसंहिता __________ ग्रंथ: अस्ति।

(ग) ब्रह्मगुप्त: __________ निर्मितवान।

(घ) संस्कृत विषयेण सह उत्तीर्ण: कोऽपि स्नातक: __________ पदे सैनिक क्षेत्रे नियुज्यते।

22. (क) जनसंचारमाध्यमा: स्थूल तया कतिधा विभुक्तं शक्यते? 1x4=4

(ख) सर्वभाषाकवि सम्मेलनम् कस्मिन् अवसरे आयोज्यते?

(ग) दूरदर्शनत: संस्कृत वार्तानामं प्रथमं प्रसारणं कस्मिन् वर्षे अभवत्?

(घ) दूरदर्शनस्य 'डीडी ज्ञानदर्शनम्' प्रतिसप्ताहं कति दिवसेषु संस्कृत कार्यक्रमं प्रसारयति?

23. साप्ताहिकी पत्रिका का अस्ति। एकस्या: साप्ताहिकी पत्रिकाया: नामोल्लेख कुरुत। 2

24. (क) पत्रिकाया, भाषा कीदृशी भवेत्? 1

(ख) अन्तिमरूपेण मुद्रणात् प्राक् सामग्रया: अशुद्धि संशोधनार्थं किं क्रियते? 1

(ग) साम्प्रतं मुद्रण कार्ये कस्य यंत्रस्य अप्रितम महत्त्वं वर्तते? 1

(घ) त्रुटिशोधने प्रयुक्तं अधोलिखितचिह्नद्वयं अभिप्रायेण सह मेलयत। 2

| | **'अ'** | | **'ब'** |
|---|---|---|---|
| (i) | # | (क) | नवीनापंक्ति: |
| (ii) | N/L | (ख) | वर्णयो: शब्दयो: वा अन्तरालं |

- o O o -



Unnati Educations
9899436384, 9654279279